[...]Public Instruction in Mysore

MIDDLE SCHOOL AND UPPER PRIMARY
EXAMINATIONS

THE SANSKRIT TEXT

1944

1,400 Copies

MYSORE:
PRINTED BY THE ASST. SUPDT., GOVT. BRANCH PRESS
1943

Price : Re. 0-4-0

सुभाषितसङ्ग्रहः

ಸುಭಾಷಿತವೆಂದರೆ ಮಹಾಜ್ಞಾನಿಗಳೂ, ಸಜ್ಜನರೂ, ಪಂಡಿತರೂ ಲೋಕ ವ್ಯವಹಾರದಲ್ಲಿ ಜನಸಾಮಾನ್ಯಕ್ಕೆ ಅನುಕೂಲಿಸುವಂತೆ ಹೇಳಿದ ಬುದ್ಧಿವಾದಗಳು. ಸುಭಾಷಿತಗಳ ವೈಶಿಷ್ಟ್ಯವೇನೆಂದರೆ ಅತಿಗಹನವಾದ, ಅರ್ಥಗರ್ಭಿತವಾದ ವಿಷಯಗಳನ್ನು ಸರಳ ರೀತಿಯಲ್ಲಿ ತಿಳಿಸುವುದು. ಸಾಧಾರಣವಾಗಿ ಇವುಗಳಲ್ಲಿ ಅಡಕವಾಗಿರುವ ಅಂಶಗಳು ಸಾರ್ವತ್ರಿಕಗಳಾಗಿಯೂ, ಸಾರ್ವಕಾಲಿಕಗಳಾಗಿಯೂ ಇರುವುವು. ಇವುಗಳನ್ನು ಚೆನ್ನಾಗಿ ತಿಳಿದು, ಅದರಂತೆ ನಡೆದುಕೊಳ್ಳುವುದ ರಿಂದ ಪ್ರತಿಯೊಬ್ಬ ವ್ಯಕ್ತಿಯೂ ಗೌರವಾರ್ಹನಾಗುವುದರಲ್ಲಿ ಸಂದೇಹವಿಲ್ಲ.

ಸಂಸ್ಕೃತದಲ್ಲಿ 'ಸುಭಾಷಿತ' ಗಳು ಹೇರಳವಾಗಿವೆ. ಇವುಗಳ ಸಂಗ್ರಹ ಗಳೂ ಅನೇಕ ಭಾಷೆಗಳಲ್ಲಿ ಪರಿವರ್ತಿತಗಳಾಗಿರುತ್ತವೆ. ಇವುಗಳಲ್ಲಿ ಕೆಲವನ್ನು ಮಾತ್ರ ಇಲ್ಲಿ ಆರಿಸಿ ಕೊಟ್ಟಿರುತ್ತದೆ.

सुभाषितसङ्ग्रहः

विद्यावैभवम्

मातेव रक्षति पितेव हिते नियुङ्क्ते [1]
कान्तेव चाभिरमयत्यपनीय [2] खेदम् ।
लक्ष्मीं तनोति [3] तनोति च दिक्षु कीर्तिं
किं किं न साधयति कल्पलतेव [4] विद्या ॥ १ ॥

महात्मनां स्वभावः

विपदि धैर्यमथाभ्युदये क्षमा
सदसि [5] वाक्पटुता [6] युधि [7] विक्रमः ।
यशसि चाभिरति[8]र्व्यसनं [9] श्रुतौ [10]
प्रकृतिसिद्ध[11]मिदं हि महात्मनाम् ॥ २ ॥

सन्तः

सज्जनस्य हृदयं [12] नवनीतं
यद्वदन्ति कवयस्तदलीकम्[13] ।
अन्यदेहविलसत्परितापा-[14]
त्सज्जनो द्रवति [15] नो नवनीतम् ॥ ३ ॥
उपकारिषु यस्साधुः साधुत्वे तस्य को गुणः ।
अपकारिषु यस्साधुः स साधुस्सद्भिरुच्यते ॥ ४ ॥

विवेकः

प्रत्यहं[16] प्रत्यवेक्षेत [17] नरश्चरित[18]मात्मनः ।
किं नु मे पशुभिस्तुल्यं [19] किं नु सत्पुरुषैरिति ॥ ५ ॥

पुण्यपापयोर्लक्षणम्

श्लोकार्धेन प्रवक्ष्यामि [20] यदुक्तं ग्रन्थकोटिभिः ।
परोपकारः पुण्याय पापाय परपीडनम् ॥ ६ ॥

सत्यम्

सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूया[21]त्सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मस्सनातनः ॥ ७ ॥
अश्वमेध[22]सहस्रं च सत्यं च तुलया[23] धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते[24] ॥ ८ ॥
सत्यमेवेश्वरो लोके सत्यं[25] पद्माश्रिता सदा ।
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥ ९ ॥

देवभक्तिः

मन्त्रे[26] तीर्थे द्विजे देवे दैवज्ञे[27] भेषजे[28] गुरौ ।
यादृशी[29] भावना[30] यत्र सिद्धिर्भवति तादृशी ॥ १० ॥

वालिचरितम्

ಇಲ್ಲಿ ಸಂಗ್ರಹವಾಗಿ ಕೊಟ್ಟಿರುವ ವಾಲಿಚರಿತವು ಆದಿಕಾವ್ಯವೆಂದು ಪ್ರಸಿದ್ಧವಾದ ಶ್ರೀಮದ್ರಾಮಾಯಣದಿಂದ ಆರಿಸಿದುದು. ಈ ಕಾವ್ಯವನ್ನು ಶ್ರೀಮದ್ವಾಲ್ಮೀಕಿ ಮಹರ್ಷಿಗಳು ವಿರಚಿಸಿದರು. ಈ ಕಾವ್ಯದ ಮಾಹಾತ್ಮ್ಯೆಯು ಅತ್ಯದ್ಭುತವಾದುದು. ಇದರಲ್ಲಿ ಅಡಕವಾಗಿರುವ ವಿಚಾರಗಳು ಮನಸ್ಸಿಗೆ ಹರ್ಷವನ್ನೂ, ಶಾಂತಿಯನ್ನೂ ಕೊಡತಕ್ಕವು. ಪಾಶ್ಚಾತ್ಯದೇಶೀಯರೂ ಕೂಡ ಈ ಕವಿತೆಗೆ ಮೆಚ್ಚಿ ಬಹು ಆಸಕ್ತಿಯನ್ನು ತೋರಿಸಿ ಅವರವರ ದೇಶಭಾಷೆಗಳಲ್ಲಿ ಭಾಷಾಂತರ ಮಾಡಿದ್ದಾರೆ.

ಶ್ರೀಮದ್ರಾಮಾಯಣದಲ್ಲಿ ಬಾಲಕಾಂಡ, ಅಯೋಧ್ಯಾಕಾಂಡ, ಅರಣ್ಯಕಾಂಡ, ಕಿಷ್ಕಿಂಧಾಕಾಂಡ, ಸುಂದರಕಾಂಡ, ಯುದ್ಧಕಾಂಡ ಮತ್ತು ಉತ್ತರಕಾಂಡ—ಎಂಬ ಏಳು ಭಾಗಗಳಿವೆ. ಪ್ರಕೃತವಾದ ವಾಲಿಚರಿತವನ್ನು ಕಿಷ್ಕಿಂಧಾಕಾಂಡದಿಂದ ಸಂಗ್ರಹಿಸಲಾಗಿದೆ.

ಶ್ರೀರಾಮಚಂದ್ರನಿಗೂ ಸುಗ್ರೀವನಿಗೂ ಸ್ನೇಹವಾದ ಬಳಿಕ ಸುಗ್ರೀವನು ವಾಲಿಯ ಶಕ್ತಿಯನ್ನು ವಿವರಿಸಿದುದು, ಸುಗ್ರೀವನಿಗೆ ನಂಬುಗೆಯನ್ನು ಹುಟ್ಟಿಸಲು ಶ್ರೀರಾಮನು ತನ್ನ ಪರಾಕ್ರಮವನ್ನು ತೋರಿಸಿದುದು, ವಾಲಿಸುಗ್ರೀವರ ಯುದ್ಧ ಮತ್ತು ವಾಲಿಯ ವಧೆ—ಇವಿಷ್ಟು ಈ ಕಥಾಭಾಗದಲ್ಲಿ ವರ್ಣಿತವಾಗಿರುತ್ತದೆ.

ಈ ಕಥೆಯನ್ನು ಓದಿ ಮುಖ್ಯವಾಗಿ ನಾವು ತಿಳಿಯಬೇಕಾದ ವಿಚಾರವಾವುದೆಂದರೆ, ಸತ್ಯದ ಆಳ, ಧರ್ಮದ ತತ್ತ್ವ. ಪ್ರಪಂಚದಲ್ಲಿ ಪ್ರತಿಯೊಬ್ಬ ವ್ಯಕ್ತಿಯೂ ತನ್ನ ಜೀವನವನ್ನು ಸುಲಲಿತವಾಗಿಯೂ, ಸುಗಮವಾಗಿಯೂ ನಡೆಸಿಕೊಳ್ಳಲು ಸತ್ಯಸನ್ಧತೆ ಧರ್ಮಾಚರಣೆ—ಇವುಗಳೇ ಮೂಲಾಧಾರಗಳು. ಸತ್ಯಧರ್ಮಗಳ ಚ್ಯುತಿ ಮಾನವನ ನಾಶಕ್ಕೆ ಕಾರಣವು. ಸುಖದುಃಖಮಿಳಿತವಾಗಿರುವ ಜೀವನಕ್ರಮದಲ್ಲಿ ದುಃಖದಿಂದ ಪಾರಾಗಿ ಸುಖಶಾಂತಿಗಳನ್ನು ಪಡೆಯುವುದೇ ಮಾನವನ ಧ್ಯೇಯ. ಈ ಧ್ಯೇಯಸಾಧನೆಗೆ ಮಹಾಪುರುಷರು ಹಾಕಿರುವ ಮೇಲ್ಪಂಕ್ತಿಯನ್ನು ವಿಮರ್ಶನಾಪೂರ್ವಕವಾಗಿ ತಿಳಿದು ಅನುಸರಿಸಬೇಕು.

वालिचरितम्

सुग्रीव[1]उवाच—

श्रूयतां[2] राम यद्वृत्तमादितः[3] प्रभृति त्वया ।
यथा वैरं समुद्भूतं यथा चाहं निराकृतः ॥ १
वाली नाम मम भ्राता ज्येष्ठः शत्रुनिषूदनः[4] ।
कपीनामीश्वरो राज्ये कृतः परमसम्मतः ॥ २

वालिसुग्रीववैरकारणम्

मायावी नाम तेजस्वी किष्किन्धाद्वारमागतः ।
नर्दति स्म[5] सुसंरब्धो वालिनं चाह्वयद्रणे ॥ ३
श्रुत्वा न ममृषे[6] वाली निष्पपात[7] जवात्तदा ।
ततोऽहमपि सौहार्दान्निस्सृतो वालिना सह[8] ॥ ४
स तु मे भ्रातरं दृष्ट्वा मां च दूरादवस्थितम् ।
प्रविवेशासुरो वेगाद्धरण्या विवरं[9] महत् ॥ ५
तं प्रविष्टं रिपुं दृष्ट्वा प्रविवेश स्वयं हरिः ।
तस्य प्रविष्टस्य बिलं साग्रः[10] संवत्सरो गतः ॥ ६
स्थितस्य च मम द्वारि सकालो व्यत्यवर्तत[11] ।
भ्रातरं न च पश्यामि पापाशङ्कि[12] च मे मनः ॥ ७
अथ दीर्घस्य कालस्य बिलात्तस्माद्विनिस्सृतम्[13] ।
सफेनं[14] रुधिरं दृष्ट्वा बभूवाहं सुदुःखितः ॥ ८
अहं त्ववगतो बुद्ध्या चिह्नैस्तैर्भ्रातरं हतम् ।
पिधाय[15] च बिलद्वारं किष्किन्धामागतः सखे ॥ ९
ततोऽहं मन्त्रिभिस्तत्र सम्मतैरभिषेचितः ।
आजगाम[16] रिपुं हत्वा वाली तमसुरोत्तमम् ॥ १०
अभिषिक्तं तु मां दृष्ट्वा वाली संरक्तलोचनः ।
निर्वासयामास[17] ततो वस्त्रेणैकेन मां तदा ॥ ११

तेनाहमपविद्धश्च[18] हृतदारश्च[19] राघव ।
तद्भयाच्च मही कृत्स्ना क्रान्तेयं[20] सवनार्णवा[21] ॥ १२
ऋष्यमूकं गिरिवरं भार्याहरणदुःखितः ।
प्रविष्टोऽस्मि दुराधर्षं[22] वालिनः कारणान्तरे[23] ॥ १३
एतत्ते सर्वमाख्यातं वैरानुकथनं महत् ।
कर्तुमर्हसि मे वीर प्रसादं तस्य निग्रहात्[24] ॥ १४

सुग्रीवविश्वासार्थं श्रीरामवचनम्

एवमुक्तस्तु तेजस्वी धर्मज्ञो[25] धर्मसंहितम् ।
वचनं वक्तुमारेभे सुग्रीवं प्रहसन्निव ॥ १५
यावत्तं नाभिपश्यामि तव भार्यापहारिणम् ।
तावत्स जीवे[26]त्पापात्मा[27] वाली चारित्रदूषकः[28] ॥ १६

सुग्रीवकृतवालिबलवर्णनम्

सुग्रीव उवाच—

महिषो दुन्दुभिर्नाम कैलासशिखरप्रभः ।
वीर्योत्सेकेन दुष्टात्मा वालिनं चाह्वयद्रणे[29] ॥ १७
विषाणयोर्गृहीत्वा तं दुन्दुभिं गिरिसन्निभम् ।
अविध्यत[30] तदा वाली धरण्यां तमापातयत्[31] ॥ १८
तं तोलयित्वा बाहुभ्यां गतसत्वमचेतनम् ।
चिक्षेप[32] बलवान्वाली वेगेनैकेन योजनम् ॥ १९
इमे च विपुलास्सालाः सप्तशाखावलम्बिनः[33] ।
यत्रै[34]कं[35] घटते[36] वाली निष्पत्रयितु[37]मोजसा ॥ २०
सुग्रीवश्शङ्कित[38]श्चासी न्नित्यं वीर्येण राघवे ।
वालिनश्च बलं तस्मात्कथयामास वानरः ॥ २१

श्रीरामबलप्रदर्शनम् सुग्रीवप्रत्ययश्च[39]

उत्स्मयित्वा[40] महाबाहुः प्रेक्ष्य चास्थि[41] महाबलः ।
पादाङ्गुष्ठेन चिक्षेप संपूर्णं दशयोजनम् ॥ २२
बिभेद[42] च पुनस्सलान्सप्तै[43]केन महेषुणा ।
गिरिं रसातलं चैव जनयन्[44] प्रत्ययं तदा ॥ २३

वालिसुग्रीवयोर्युद्धम्

ततः [45]प्रीतमनास्तेन विश्वस्तः स महाकपिः ।
किष्किन्धां रामसहितो जगाम च गुहां तदा ॥ २४
सुग्रीवो व्यनद[46]द्धोरं [47] वालिनो ह्वानकारणात्[48] ।
गाढं परिहितो [49] वेगान्नादै[50]र्भिन्दन्निवाम्बरम् [51]॥ २५
तं श्रुत्वा निनदं भ्रातुः क्रुद्धो वाली महाबलः ।
निश्चक्राम सुसंरब्धो भास्करोऽस्ततटादिव [52] ॥ २६
ततः सुतुमुलं युद्धं वालिसुग्रीवयोरभूत्[53] ।
गगने ग्रहयोर्घोरं बुधाङ्गारकयोरिव ॥ २७
तलैरशनिकल्पै[54]श्च वज्रकल्पैश्च मुष्टिभिः ।
जघ्नतुः[55] समरेऽन्योऽन्यं भ्रातरौ क्रोधमूर्छितौ ॥ २८
ततो रामो धनुष्पाणि[56]स्तावुभौ समुदीक्ष्य तु ।
अन्योन्यसदृशौ वीरा[57]वुभौ देवाविवाश्विनौ ॥ २९
यन्नावगच्छत्सुग्रीवं वालिनं वापि राघवः ।
ततो न कृतवान्बुद्धिं मोक्तुमन्तकरं[58] शरम् ॥ ३०
एतस्मिन्नन्तरे भग्नः सुग्रीवस्तेन वालिना ।
अपश्यन्रा[59]घवं नाथमृष्यमूकं प्रदुद्रुवे [60] । ३१
तं प्रविष्टं वनं दृष्ट्वा वाली शापभयार्दितः ।
मुक्तो[61] ह्यसि त्वमित्युक्त्वा संनिवृत्तो[62] महाद्युतिः ॥ ३२
राघवोऽपि सह भ्रात्रा सह चैव हनूमता ।
तदेव वनमागच्छत्सुग्रीवं चाब्रवीद्वचः ॥ ३३
सुग्रीव श्रूयतां तात क्रोधश्च व्यपनीयताम् । [63]
कारणं येन बाणोऽयं न मया स विसर्जितः ॥ ३४
अलङ्कारेण वेषेण प्रमाणेन गतेन च ।
त्वं च सुग्रीव वाली च सदृशौ स्थः परस्परम् ॥ ३५
ततोऽहं रूपसादृश्यान्मोहितो[64] वानरोत्तम ।
नोत्ससर्ज[65] महावेगं शरं शत्रुनिबर्हणम् ॥ ३६
एतन्मुहूर्ते सुग्रीव पश्य वालिनमाहवे ।
निरस्त[66]मिषुणैकेन वेष्टमानं[67] महीतले ॥ ३७
अभिज्ञानं [68] कुरुष्व त्वमात्मनो वानरेश्वर ।
येन त्वामभिजानीयां[69] द्वन्द्वयुद्धमुपागतम् ॥ ३८

गजपुष्पी[70]मिमां फुल्लामुत्पाट्य[71] शुभलक्षणाम् ।
कुरु लक्ष्मण कण्ठेऽस्य सुग्रीवस्य महात्मनः ॥ ३९
ततो गिरितटे जातामुत्पाट्य सुमनोहराम् ।
लक्ष्मणो गजपुष्पीं तां तस्य कण्ठे व्यसर्जयत् ॥ ४०
स तया शुशुभे श्रीमाँल्लतया कण्ठसक्तया ।
विपरीत[72] इवाकाशे सूर्यो नक्षत्रमालया[73] ॥ ४१
जगाम सह रामेण किष्किन्धां वानरोत्तमः ।
ननर्द क्रूरनादेन विनिर्भिन्दन्निवाम्बरम् ॥ ४२
शब्दं दुर्मर्षणं श्रुत्वा वाली भ्रातुरमर्षणः ।
अनुमान्य[74] तदा तारां निष्पपात महौजसा[75] ॥ ४३
स ददर्श ततः श्रीमान् सुग्रीवं हेमपिङ्गलम्[76] ।
सुसंवीत[77]मवष्टब्धं[78] दीप्यमानमिवानलम्[79] ॥ ४४
स वाली गाढसंवीतो मुष्टिमुद्यम्य वीर्यवान् ।
सुग्रीवमेवाभिमुखो ययौ योद्धुं कृतक्षणः ॥ ४५
तौ भीमबलविक्रान्तौ सुपर्णसमवेगितौ[80] ।
प्रवृद्धौ घोरवपुषौ चन्द्रसूर्याविवाम्बरे ॥ ४६
परस्परममित्रघ्नौ छिद्रान्वेषणतत्परौ[81] ।
युयुधाते समं घोरं परस्परजयैषिणौ ॥ ४७
ततोऽवर्धत वाली तु बलवीर्यसमन्वितः ।
सूर्यपुत्रो महावीर्यः सुग्रीवः पर्यहीयत ॥ ४८
वालिना भग्नदर्पस्तु सुग्रीवो मन्दविक्रमः ।
वालिनं प्रति सामर्षो दर्शयामास लाघवम् ॥ ४९
वृक्षैस्सशाखैः शिखरैर्वज्रकोटिनिभैर्नखैः ।
मुष्टिभिर्जानुभिः पद्भिर्बाहुभिश्च पुनः पुनः ॥ ५०
तयोर्युद्धमभूद्घोरं सर्वलोकभयावहम् ।
वालिसुग्रीवयोस्तत्र वृत्रवासवयोरिव[82] ॥ ५१
हीयमानमथोऽपश्यत्सुग्रीवं रघुनायकः ।
वीक्षमाणं दिशश्चैव राघवं च मुहुर्मुहुः[83] ॥ ५२
ततो रामो महातेजा आर्तं[84] दृष्ट्वा हरीश्वरम् ।
सशरं वीक्षते वीरो वालिनो वधकारणात् ॥ ५३
ततो धनुषि सन्धाय शरमाशीविषोपमम्[85] ।
पूरयामास तच्चापं कालचक्रमिवान्तकः[86] ॥ ५४

मुक्तस्तु वज्रनिर्घोषः प्रदीप्ताशनिसंनिभः [87] ।
राघवेण महाबाणो वालिवक्षसि पातितः ॥ ५५
ततः शरेणाभिहतो रामेण रणकर्कशः ।
पपात सहसा वाली निकृत्त [88] इव पादपः [89] ॥ ५६
भूमौ निपतितस्यापि तस्य देहं महात्मनः ।
न श्री[90]र्जहाति न प्राणा न तेजो न पराक्रमः ॥ ५७
शक्रदत्ता वरा माला काञ्चनी वज्रभूषिता ।
दधार [91] हरिमुख्यस्य प्राणांस्तेजः श्रियं च सा ॥ ५८
महेन्द्रमिव दुर्धर्षं महेन्द्रमिव दुस्सहम् ।
महेन्द्रपुत्रं पतितं वालिनं हेममालिनम् ॥ ५९
सिंहोरस्कं [92] महाबाहुं दीप्तास्यं[93] हरिलोचनम् [94] ।
लक्ष्मणानुगतो रामो ददर्शोपससर्प [95]च ॥ ६०

रामवालिनोर्धर्मविषयकः संवादः

स दृष्ट्वा राघवं वाली लक्ष्मणञ्च महाबलम् ।
अब्रवीत्प्रश्रितं वाक्यं परुषं धर्मसंयुतम् ॥ ६१
पराङ्मुखवधं [96] कृत्वा को नु प्राप्तस्त्वया गुणः ।
यदहं युद्धसंरब्धः शरेणोरसि ताडितः ॥ ६२
त्वं नराधिपतेः पुत्रः प्रथितः प्रियदर्शनः ।
कुलीनः [97] सत्त्वसंपन्नस्तेजस्वी चरितव्रतः ॥ ६३
दमः[98] शमः[99] क्षमा [100] धर्मो धृतिः सत्यं पराक्रमः ।
पार्थिवानां गुणा राजन् दण्डश्चाप्यपराधिषु ॥ ६४
नाहं त्वामभिजानामि धर्मच्छद्माभिसंवृतम् [101]।
सतां वेषधरं पापं प्रच्छन्नमिव पावकम् ॥ ६५
विषये वा पुरे वा ते यथा नापकरोम्यहम् ।
न च त्वामवजाने[102] च कस्मात्त्वं हंस्यकिल्बिषम् [103] ॥ ६६
हत्वा बाणेन काकुत्स्थ मामिहानपराधिनम् ।
किं वक्ष्यसि सतां मध्ये कर्म कृत्वा जुगुप्सितम् ॥ ६७
मामेव यदि पूर्वं त्वमेतदर्थमचोदयः [104]।
मैथिलीमहमेकाह्ना तव चानीतवान्खलु ॥ ६८

राक्षसं च दुरात्मानं तव भार्यापहारिणम्।
कण्ठे बद्ध्वा प्रदद्यां तेऽनिहतं [105] रावणं रणे ॥ ६९
अयुक्तं यदधर्मेण त्वयाहं निहतो रणे।
क्षमं चेद्भवता प्राप्तमुत्तरं साधु चिन्त्यताम् ॥ ७०
इत्युक्तः प्रश्रितं वाक्यं धर्मार्थसहितं हितम् [106]।
परुषं वालिना रामः पश्चाद्वालिनमब्रवीत् ॥ ७१
धर्ममर्थं च कामं च समयं चापि लौकिकम्।
अविज्ञाय कथं बाल्यान्मामिहाद्य विगर्हसे [107] ॥ ७२
इक्ष्वाकूणामियं भूमिः सशैलवनकानना।
मृगपक्षिमनुष्याणां निग्रहानुग्रहौ यतः [108] ॥ ८३
तां पालयति धर्मात्मा भरतस्सत्यवागृजुः।
धर्मकामार्थतत्त्वज्ञो निग्रहानुग्रहे रतः ॥ ७४
तस्य धर्मकृतादेशा वयमन्ये च पार्थिवाः।
चरामो वसुधां कृत्स्नां धर्मसन्तानमिच्छवः [109] ॥ ७५
ते वयं धर्मविभ्रष्टं स्वधर्मे परमे स्थिताः।
भरताज्ञां पुरस्कृत्य निगृह्णीम यथाविधि [110] ॥ ७६
त्वं तु संक्लिष्टधर्मश्च [111] कर्मणा च विगर्हितः।
कामतन्त्रप्रधानश्च न स्थितो राजवर्त्मनि ॥ ७७
ज्येष्ठो भ्राता पिता वापि यश्च विद्यां प्रयच्छति।
त्रयस्ते पितरो ज्ञेया धर्मे च पथि वर्तिनः ॥ ७८
यवीया [112] नात्मनः पुत्रः शिष्यश्चापि गुणोदितः।
पुत्रवत्ते त्रयश्चिन्त्या धर्मश्चैवात्र कारणम् ॥ ७९
सूक्ष्मः परमदुर्ज्ञेयः सतां धर्मः प्लवङ्गम।
हृदिस्थः सर्वभूतानामात्मा [113] वेद शुभाशुभम् ॥ ८०
तदेतत्कारणं पश्य यदर्थं त्वं मया हतः।
भ्रातुर्वर्तसि भार्यायां हित्वा धर्मं सनातनम् ॥ ८१
अस्य त्वं धरमाणस्य सुग्रीवस्य महात्मनः।
रुमायां वर्तसे कामात्स्नुषायां पापकर्मकृत् ॥ ८२
तद्व्यतीतस्य [114] ते धर्मात्कामवृत्तस्य वानर।
भ्रातृभार्याभिमर्शेऽस्मिन् दण्डोऽयं प्रतिपादितः ॥ ८३
औरसीं [115] भगिनीं वापि भार्यां वाप्यनुजस्य यः।
प्रचरेत नरः कामात्तस्य दण्डो वधः स्मृतः ॥ ८४

श्रूयते मनुना गीतौ श्लोकौ चारित्रवत्सलौ ।
गृहीतौ धर्मकुशलैस्तथा तच्चरितं मया ॥ ८५
राजभिर्धृतदण्डाश्च [116] कृत्वा पापानि मानवाः ।
निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो [117] यथा ॥ ८६
शासनाद्वापि मोक्षाद्वा स्तेनः पापात्प्रमुच्यते ।
राजा त्वशासन्पापस्य तदवाप्नोति [118] किल्बिषम् ॥ ८७
शृणु चाप्यपरं भूयः कारणं हरिपुङ्गव ।
यच्छ्रुत्वा हेतुम[119]द्वीर न मन्युं कर्तुमर्हसि ॥ ८८
वागुराभिश्च [120] पाशैश्च कूटैश्च [121] विविधैर्नराः ।
प्रतिच्छन्नाश्च [122] दृश्याश्च गृह्णन्ति सुबहून्मृगान् ॥ ८९
यान्ति राजर्षयश्चात्र मृगयां [123] धर्मकोविदाः ।
विद्ध्यन्ति [124] विमुखांश्चापि न च दोषोऽत्र विद्यते ॥ ९०
तस्मात्त्वं निहतो युद्धे मया बाणेन वानर ।
अयुध्यन्प्रतियुध्यन्वा यस्माच्छाखामृगो[125] ह्यसि ॥ ९१
दुर्लभस्य च धर्मस्य जीवितस्य शुभस्य च ।
राजानो वानरश्रेष्ठ प्रदातारो न संशयः ॥ ९२
तान्न हिंस्यान्न चाक्रोशेन्नाक्षिपेन्नाप्रियं वदेत् ।
देवा मानुषरूपेण चरन्त्येते महीतले ॥ ९३
एवमुक्तस्तु रामेण वाली प्रव्यथितो भृशम् ।
न दोषं राघवे दध्यौ [126] धर्मेऽधिगतनिश्चयः ॥ ९४
प्रत्युवाच ततो रामं प्राञ्जलिर्वानरेश्वरः ।
यत्त्वमात्थ नरश्रेष्ठ तत्तथैव न संशयः ॥ ९५
यदयुक्तं मया पूर्वं प्रमादाद्वाक्यमप्रियम् ।
तत्रापि खलु मां दोषं कर्तुं नार्हसि राघव ॥ ९६
मामप्यवगतं [127] धर्माद्व्यतिक्रान्तंपुरस्कृतम्[128] ।
धर्मसंहितया वाचा धर्मज्ञ परिपालय ॥ ९७
बाष्पसंरुद्धकण्ठस्तु वाली सार्तरवः शनैः ।
उवाच रामं संप्रेक्ष्य पङ्कलग्न इव द्विपः ॥ ९८
बालश्चाकृतबुद्धिश्च ह्येकपुत्रश्च मे प्रियः ।
तारेयो राम भवता रक्षणीयो महाबलः ॥ ९९
सुग्रीवे चाङ्गदे चैव विधत्स्व मतिमुत्तमाम् ।
त्वं हि गोप्ता च शास्ता [129] च कार्याकार्यविधौ स्थितः ॥ १००

मद्दोषकृतदोषां [130] तां यथा तारां तपस्विनीम् ।
सुग्रीवो नावमन्येत तथावस्थातुमर्हसि ॥ १०१
इत्युक्त्वा वानरो रामं विरराम [131] हरीश्वरः ।
स तमाश्वासयद्रामो वलिनं व्यक्तदर्शनम् ॥ १०२
दण्ड्ये [132] यः पातयेद्दण्डं दण्ड्यो यश्चापि दण्ड्यते ।
कार्यकारणसिद्धार्थावु[133]भौ तौ नावसीदतः ॥ १०३
यथा त्वय्यङ्गदो नित्यं वर्तते वानरेश्वर ।
तथा वर्तेत सुग्रीवे मयि चापि न संशयः ॥ १०४
निशम्य [134] वचनं तस्य वाली विगतकल्मषः ।
सुग्रीवाय ददौ मालामिदं वचनमब्रवीत् ॥ १०५
सुखार्हं सुखसंवृद्धं [135] पुत्रं पुत्रमिवौरसम् ।
मया हीनमहीनार्थं [136] सर्वतः परिपालय [137] ॥ १०६
एवमुक्त्वाथ सुग्रीवं दृष्ट्वा चैवात्मजं [138] स्थितम् ।
संसिद्धः प्रेत्यभावाय स्नेहादङ्गदमब्रवीत् ॥ १०७
देशकालौ भजस्वाद्य क्षममाणः प्रियाप्रिये [139] ।
सुखदुःखसहः काले सुग्रीववशगो भव ॥ १०८
इत्युक्त्वाथ विवृत्ताक्षः शरसंपीडितो हरिः ।
राममेव मुहुः पश्यन्प्राणांस्त्यक्त्वा दिवं गतः ॥ १०९
मङ्गलं कोसलेन्द्राय सुग्रीवहितकारिणे [140] ।
वालिसद्गतिदात्रे च रामचन्द्राय मङ्गलम् ॥ ११०

पञ्चतन्त्रके—मित्रभेदसङ्ग्रहः

ಪಂಚತಂತ್ರಕವೆಂಬುದು ಸಂಸ್ಕೃತದಲ್ಲಿರುವ ಒಂದು ನೀತಿಶಾಸ್ತ್ರಗ್ರಂಥ. ಮಹಿಲಾರೋಪ್ಯನಗರದ ಅಮರಶಕ್ತಿ ಎಂಬ ರಾಜನ ಮೂರು ಮಕ್ಕಳಿಗೆ ಸುಲಭವಾದ ರೀತಿಯಿಂದ ಬೇಗನೆ ವ್ಯವಹಾರದ ತಿಳಿವಳಿಕೆಯನ್ನುಂಟುಮಾಡಿಕೊಡುವುದಕ್ಕಾಗಿ ವಿಷ್ಣುಶರ್ಮನೆಂಬ ಬ್ರಾಹ್ಮಣನು ಈ ಗ್ರಂಥದಲ್ಲಿರುವ ಕಥೆಗಳನ್ನು ಹೇಳಿದನೆಂದೂ ಇದರಿಂದ ಅವರು ಆರು ತಿಂಗಳೊಳಗೇ ನೀತಿಶಾಸ್ತ್ರನಿಪುಣರಾದರೆಂದೂ ಈ ಗ್ರಂಥದಲ್ಲಿ ಬರೆದಿದೆ. ಮಿತ್ರಭೇದವೆಂಬುದು ಈ ಗ್ರಂಥದ ಮೊದಲನೆಯ ಭಾಗವು. ಇದಲ್ಲದೆ ಮಿತ್ರಸಂಪ್ರಾಪ್ತಿ, ಕಾಕೋಲೂಕೀಯ, ಲಬ್ಧ—ಪ್ರಣಾಶ, ಅಪರೀಕ್ಷಿತಕಾರಕ—ಎಂಬ ಬೇರೆ ನಾಲ್ಕು ಭಾಗಗಳಿವೆ. ಈ ಒಂದೊಂದು ಭಾಗಕ್ಕೂ "ತಂತ್ರ" ವೆಂಬ ಹೆಸರನ್ನು ಕೊಟ್ಟಿರುತ್ತಾನೆ. ತಂತ್ರವೆಂದರೆ ಶಾಸ್ತ್ರವು. ಆದುದರಿಂದಲೇ ಐದು ವಿಷಯಗಳನ್ನು ತಿಳಿಸುವ ಈ ಶಾಸ್ತ್ರಕ್ಕೆ 'ಪಂಚತಂತ್ರ' ವೆಂಬ ಹೆಸರು ಬಂದಿದೆ.

ಕಥೆಗಳಲ್ಲಿ ಮೂಕಪ್ರಾಣಿಗಳನ್ನು ಮನುಷ್ಯರಂತೆ ಮಾತನಾಡುವ ಪಾತ್ರಗಳನ್ನಾಗಿ ಎಣಿಸಿರುತ್ತದೆ. ಅವುಗಳ ಮೂಲಕವಾಗಿ ಜನರ ವಿಚಿತ್ರ ಸ್ವಭಾವಗಳನ್ನು ಹೊರಗೆಡುಹುವುದಕ್ಕೆ ಗ್ರಂಥಕರ್ತನು ಮಾಡಿರುವ ಕೌಶಲವು ಎಲ್ಲರನ್ನೂ ತಲೆದೂಗಿಸುವಂತಿದೆ. ಈ ಬಗೆಯ ಕಥೆಗಳನ್ನು ಮೊಟ್ಟಮೊದಲು ಬರೆದವನು ಪಂಚತಂತ್ರಕಕಾರನೇ. ಇವುಗಳನ್ನು ಅನುಕರಿಸಿಕೊಂಡು ಈಚೆಗೆ ಈಸೋಪನ ಕಥೆಗಳಾಗಿವೆಯೆಂದು ಹೇಳುತ್ತಾರೆ. ಈ ಗ್ರಂಥವು ಸುಮಾರು ಕ್ರಿ.ಶ. ೫ನೆಯ ಶತಮಾನದಲ್ಲಿ ರಚಿತವಾಗಿರಬಹುದೆಂದು ವಿಮರ್ಶಕರು ಊಹಿಸುತ್ತಾರೆ.

ಪಠ್ಯಭಾಗವಾಗಿ ಆರಿಸಿರುವ ಭಾಗವು ಪಂಚತಂತ್ರಕದ ಮಿತ್ರಭೇದದ ಸಂಗ್ರಹವಾಗಿರುತ್ತದೆ. ಇದರಲ್ಲಿ ನರಿಯು ಜಾತಿವೈರಿಗಳಾದ ಸಿಂಹವೃಷಭಗಳಿಗೆ ಸ್ನೇಹವನ್ನು ಮಾಡಿಸಿದ ಮತ್ತು ಕೊನೆಗೆ ಆ ಸ್ನೇಹವನ್ನು ನಾಶಗೊಳಿಸಿದ ರೀತಿಯನ್ನು ವಿಶದವಾಗಿ ವಿವರಿಸಿರುತ್ತದೆ.

पञ्चतन्त्रकम्

मित्रभेदसङ्ग्रहः

मनवे [1] वाचस्पतये[2] शुक्राय [3] पराशराय [4] ससुताय [5] ।
चाणक्याय[6] च विदुषे नमोऽ[7]स्तु नयशास्त्रकर्तृभ्यः ॥ १ ॥

अथातः प्रारभ्यते मित्रभेदो[8] नाम प्रथमं तन्त्रम् । यस्यायमादिमः श्लोकः—

वर्धमानो महान्स्नेहः सिंहगोवृषयोर्वने ।
पिशुनेना[9]तिलुब्धेन [10] जम्बुकेन[11] विनाशितः ॥ २ ॥

तद्यथानुश्रूयते—

अस्ति दाक्षिणात्ये[12] जनपदे महिलारोप्यं नाम नगरम् । तत्र धर्मोपार्जितभूरिविभवो [13] वर्धमानको नाम वणिक्पुत्रो बभूव । तस्य कदाचिद्रात्रौ शय्यारूढस्य चिन्ता समुत्पन्ना—तत्प्रभूतेऽपि वित्तेऽर्थोपायाश्चिन्तनीयाः कर्तव्याश्चेति ॥

यतः उक्तञ्च—

अर्थेभ्योऽपि हि वृद्धेभ्यः [14] संवृद्धेभ्य[15]स्ततस्ततः ।
प्रवर्तन्ते क्रियास्सर्वाः पर्वतेभ्य इवापगाः [16]॥ ३ ॥

स चार्थः पुरुषाणां षड्भिरुपायैर्भवति—भिक्षया, नृपसेवया, कृषिकर्मणा, [17] विद्योपार्जनेन, व्यवहारेण,[18] वणिक्कर्मणा वा । सर्वेषामपि तेषां वाणिज्येना[19]तिरस्कृतो[20]ऽर्थलाभः स्यात् । उक्तं च यतः—

उपायानां च सर्वेषामुपायः पण्यसङ्ग्रहः [21] ।
धनार्थं शस्यते [22] ह्येकस्तदन्यः संशयात्मकः ॥ ४ ॥

तच्च वाणिज्यं सप्तविधमर्थागमाय स्यात् । तद्यथा—गान्धिकव्यवहारः,[23] निक्षेपप्रवेशः;[24] गोष्ठिककर्म,[25] परिचितग्राहकागमः,[26] मिथ्या-

क्रयकथनम्,[27] कूटतुलामानम्,[28] देशान्तराद्भाण्डानयनं[29] चेति। तेषु देशान्तराद्भाण्डानयनमेव सुकरम्[30]। उक्तं च—

द्विगुणं[31] त्रिगुणं[32] वित्तं भाण्डक्रयविचक्षणाः।
प्राप्नुवन्त्युद्यमाल्लोका दूरदेशान्तरं गताः॥ ५॥

इत्येवं संप्रधार्य मथुरागामीनि भाण्डान्यादाय शुभायां तिथौ गुरुजनानुज्ञातः सुरथाधिरूढः[33] प्रस्थितः[34]। तस्य च मङ्गलवृषभौ सञ्जीवकनन्दकनामानौ गृहोत्पन्नौ धूर्वोढारौ[35] स्थितौ। तयोरेकः सञ्जीवकाभिधानो यमुनाकच्छमवतीर्णः[36] सन् पङ्कपूर[37]मासाद्य कलितचरणो युगभङ्गं[38] विधाय निषसाद। तं दृष्ट्वा 'मतिमान्नरः स्वल्पस्य कृते भूरि न नाशयेत्' इत्यालोच्य स सञ्जीवकं तत्रैव परित्यज्य प्रस्थितः। सञ्जीवकोऽपि आयुःशेषतया शिशिरतरवातैराप्यायितशरीरः[39] कथञ्चिदप्युत्थाय यमुनातटमुपपेदे। तत्र स बालतृणाग्राणि भक्षयन् कतिपयैरहोभिः हरवृषभ इव पीनः ककुद्मान्[40] बलवांश्च संवृत्तः, प्रत्यहं वल्मीकशिखराग्राणि शृङ्गाभ्यां विदारयन् गर्जमान आसीत्॥

साधु चेदमुच्यते—

अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं[41] विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः
कृतप्रयत्नोऽपि गृहे विनश्यति॥ ६॥

अथ कदाचित् पिङ्गलको नाम सिंहः सर्वमृगपरिवृतः पिपासाकुलः[42] उदकपानार्थं यमुनातटमवतीर्णः सञ्जीवकस्य गम्भीरतररावं दूरादेवाश्रृणोत्। तच्छ्रुत्वातीव व्याकुलहृदयः[43] ससाध्वसमाकारं प्रच्छाद्य[44] वटतले चतुर्मण्डलावस्थानेना[45]वस्थितः॥

अथ तस्य करटकदमनकनामानौ द्वौ शृगालौ मन्त्रिपुत्रौ भ्रष्टाधिकारौ[46] सदानुयायिनावास्ताम्। तौ च परस्परं मन्त्रयतः॥

तत्र दमनकोऽब्रवीत्—"भद्र करटक, अयं तावदस्मत्स्वामी पिङ्गलक उदकग्रहणार्थं यमुनाकच्छमवतीर्णः किं निमित्तं पिपासाकुलोऽपि

निवृत्य व्यूहरचनां विधाय दौर्मनस्येना[17]भिभूतोऽत्र वटतले स्थितः ? ”

करटक आह—“ भद्र, किमावयोरनेन व्यापारेण ? आवयोर्भक्षितशेष आहारोऽस्त्येव । ”

दमनक आह—“ तत्किं भवानाहारार्थी केवलमेव ? तन्न युक्तम् । उक्तं च—

यस्मिञ्जीवति जीवन्ति बहवः सोऽत्र जीवतु ।
वयांसि [48] किं न कुर्वन्ति चञ्च्वा स्वोदरपूरणम् ” ॥ ७॥

करटक आह—“ आवां तावदप्रधानौ । तत्किमावयोरनेन व्यापारेण ?”

दमनक आह—“ मामैवं वद ।

अप्रधानः प्रधानः स्यात्सेवते यदि पार्थिवम् ।
प्रधानोऽप्यप्रधानः स्याद्यदि सेवाविवर्जितः ” ॥ ८॥

करटक आह—“ अथ भवान् किं कर्तुमनाः[49] ? ”

सोऽब्रवीत्—अद्यास्मत्स्वामी भीतो भीतपरिवारश्च वर्तते । तदेनं गत्वा भयकारणं विज्ञाय सन्धि-विग्रह-यान-आसन-संश्रय-द्वैधीभावाना-[50]मेकतमेन संविधास्ये ” ।

करटक आह—“ कथं वेत्ति [51] भवान् यद्भयाविष्टोऽयं स्वामीति ? ”

सोऽब्रवीत्—“ ज्ञेयं किमत्र ? उक्तं च मनुना—

आकारैरिङ्गितै[52]र्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारैश्च लक्ष्यते[53]ऽन्तर्गतं मनः ॥ ९ ॥

तदद्यैनं भयाकुलं प्राप्य स्वबुद्धिप्रभावेण निर्भयं [54] कृत्वा वशीकृत्य च निजां साचिव्यपदवीं[55] समासादयिष्यामि ” ।

करटक आह—“ अनभिज्ञो भवान् सेवाधर्मस्य । तत्कथमेनं वशीकरिष्यासि ? ”

सोऽब्रवीत्—“ कथमहंसेवानभिज्ञः ? मया हि तातोत्सङ्गे [56] क्रीडताभ्यागतसाधूनां नीतिशास्त्रं पठतां यच्छ्रुतं सेवाधर्मस्य सारभूतं तत् हृदि स्थापितम् । श्रूयताम् ।

तच्चेदम्—

सा सेवा या प्रभुहिता ग्राह्या वाक्यविशेषतः।
आश्रयेत्पार्थिवं विद्वां[57]स्तद्वारेणैव नान्यथा "॥१०॥

करटक आह—"अथ भवांस्तत्र गत्वा किं तावत्प्रथमं वक्ष्यति तत्तावदुच्यताम्? दुराराध्या[58] हि राजानः।"

दमनक आह—"सत्यमेतत्परम्। किन्तु—

यस्य यस्य हि यो भाव[59]स्तेन तेन समाचरेत्।
अनुप्रविश्य[60] मेधावी क्षिप्रमात्मवशं नयेत्"॥ ११॥

करटक आह—"यद्येवमभिमतं तर्हि शिवास्ते पन्थानः सन्तु। यथाभिलषित[61]मनुष्ठीयताम्।" सोऽपि प्रणम्य पिङ्गलकाभिमुखं प्रतस्थे[62]॥

अथोपसृत्य दमनकः पिङ्गलकं प्रणम्य प्राप्तानुज्ञः आसने उपविष्टः। स तु पिङ्गलकः तस्य नखकुलिशालंकृतं[63] दक्षिणपाणिमुपरि दत्वा मानपुरस्सर[64]मुवाच—"अपि शिवं भवतः। कस्माच्चिराद्दृष्टोऽसि?"

दमनक आह—"न किञ्चिद्देवपादानामस्माभिः प्रयोजनम्। परं भवतां प्राप्तकालं वक्तव्यम्। वयं देवपादानामन्वयागता भृत्या आपत्स्वपि[65] पृष्ठगामिनो यद्यपि स्वमधिकारं न लभामहे तथापि देवपादानामेतद्युक्तं न भवति।

उक्तं च—

स्थानेष्वेव नियोक्तव्या भृत्याश्चाभरणानि च।
न हि चूडामणिः पादे प्रभवामीति बध्यते[66]॥ १२॥

यच्चाविवेकितया राजा भृत्यानुत्तमपदयोग्यान्हीनाधमस्थाने नियोजयति न ते तत्रैव तिष्ठन्ति, स भूपतेर्दोषो न तेषाम्। यच्च स्वाम्येवं वदति "चिराद्दृश्यते," इति तदपि श्रूयताम्।

सव्यदक्षिणयो[67]र्यत्र विशेषो नास्ति हस्तयोः।
कस्तत्र क्षणमप्यार्यो विद्यमानगतिर्वसेत्॥ १३॥

शृगालोऽयमिति मन्यमानेन ममोपरि स्वामिना यदवज्ञा[68] क्रियते तदप्ययुक्तम् ।"

पिङ्गलक आह—"भवत्वेवं तावत् । चिरन्तनः त्वमस्माकं मन्त्रिपुत्रः । तद्विश्रब्धं ब्रूहि यत्किञ्चिद्वक्तुकामः ।"

दमनक आह—"देव विज्ञाप्यं किञ्चिदस्ति । यतः षट्कर्णो मन्त्रो भिद्यतेऽतो देवपादा मद्विज्ञाप्यमैकान्तिके[69] आकर्णयन्तु[70] ॥"

अथ पिङ्गलकाभिप्रायज्ञा व्याघ्रद्वीपिवृकपुरस्सराः सर्वेऽपि तद्वचः समाकर्ण्य तत्क्षणादेव दूरीभूताः ॥

ततश्च दमनक आह—"उदकग्रहणार्थं प्रवृत्तस्य स्वामिनः किमिह निवृत्त्यावस्थानम् ?"

पिङ्गलक आह—सविलक्षणस्मितम्—"किञ्चिदपि"।

सोऽब्रवीत्—"देव, यद्यनाख्येयं[71] तत्तिष्ठतु." । तच्छ्रुत्वा पिङ्गलकश्चिन्तयामास—"योग्योऽयं दृश्यते । तत्कथयाम्येतस्याग्र आत्मनोऽभिप्रायम्" इति । प्रकाशं, "भो दमनक, शृणोषि शब्दं दूरान्महान्तम् ?"

सोऽब्रवीत्—"स्वामिन्, शृणोमि । ततः किम् ?"

पिङ्गलक आह—"भद्र, अहमस्माद्वनाद्गन्तुमिच्छामि ।"

दमनक आह—"कस्मात् ?"

पिङ्गलक आह—"यतोऽद्यास्मद्वने किमप्यपूर्वं सत्त्वं[72] प्रविष्टं, यस्यायं महाशब्दः श्रूयते । तस्य च शब्दानुरूपेण पराक्रमेण भाव्यम्" इति ।

दमनक आह—"यच्छब्दमात्रादपि भयमुपगतः स्वामी, तदप्ययुक्तम्, यतो भेरीवेणुवीणाकाहलादिभेदेन शब्दा अनेकविधा भवन्ति । तन्न केवलाच्छब्दमात्राद्भीत्वा न युक्तं स्वामिनः पूर्वोपार्जितं वनं त्यक्तुम्"।

पिङ्गलक आह—"भोः, पश्यायं मम सर्वोऽपि परिग्रहो[73] भयव्याकुलितमनाः पलायितुमिच्छति । तत्कथमहं धैर्यावष्टम्भं करोमि ?"

सोऽब्रवीत्—"स्वामिन्, नैषामेष दोषः यतः स्वामिसदृशा एव भवन्ति भृत्याः । तत्पौरुषावष्टम्भं कृत्वा त्वं तावदत्रैव प्रतिपालय यावदहमेतच्छब्दस्वरूपं ज्ञात्वाऽगच्छामि ततः पश्चाद्यथोचितं कार्यम्" इति ।

पिङ्गलक आह—"किं तत्र भवान् गन्तुमुत्सहते ?"

स आह—" किं स्वाम्यादेशात्सद्भृत्यस्य कृत्याकृत्य[74]मस्ति? उक्तञ्च—

स्वाम्यादेशात्सुभृत्यस्य न भीः सञ्जायते क्वचित्।
प्रविशेन्मुखमाहेयं[75] दुस्तरं वा महार्णवम् ॥ १४ ॥

पिङ्गलक आह—" भद्र, यद्येवं तद्गच्छ । शिवास्ते पन्थानः सन्तु" इति।

दमनकोपि तं प्रणाम्य सञ्जीवकशब्दानुसारी प्रतस्थे। पिङ्गलकोऽपि तस्य चिकीर्षितं वेत्तुं स्थानान्तरं गत्वा दमनकमार्गमवलोकयन्नेकाकी तस्थौ॥

दमनकोऽपि सञ्जीवकसकाशं गत्वा वृषभोऽयमिति परिज्ञाय हृष्टमाना व्यचिन्तयत्—'अहो ! शोभनमापतितम्। अनेनैतस्य सन्धिविग्रहद्वारेण मम पिङ्गलको वश्यो [76] भविष्यति' इति। एवं विचिन्तयन् पिङ्गलक—सकाशं गत्वा प्रणम्योपविष्टः॥

पिङ्गलक आह—" किं दृष्टं भवता तत्सत्त्वम्?"

दमनक आह—" दृष्टं स्वामिप्रसादात्"।

पिङ्गलक आह—" अपि सत्यम्?"

दमनक आह—" किं स्वामिपादाना[77]मग्रेऽसत्यं विज्ञाप्यते? उक्तञ्च—

अपि स्वल्पमसत्यं यः पुरो वदति भूभुजाम्।
देवानां च विनश्येत स द्रुतं[78] सुमहानपि ॥ १५ ॥

पिङ्गलक आह—" सत्यं दृष्टं भविष्यति भवता। न दीनोपरि महान्तः कुप्यन्तीति न त्वं तेन निपातितः। यतः—

तृणानि नोन्मूलयति [79] प्रभञ्जनो
मृदूनि नीचैः [80] प्रणतानि सर्वतः।
स्वभाव एवोन्नतचेतसामयं
महान्महत्स्वेव करोति विक्रमम् ॥ १६ ॥

दमनक आह—" अस्त्वेवं स माहात्मा, वयं कृपणाः, तथापि स्वामी यदि कथयति ततो भृत्यत्वे तं नियोजयामि"।

पिङ्गलक आह—सोच्छ्वासम्—"किं भवाञ्शक्नोत्ये[81]वं कर्तुम्?"

दमनक आह—"किमसाध्यं बुद्धेरस्ति?"

पिङ्गलक आह—"यद्येवं तर्ह्यमात्यपदेऽध्यारोपितस्त्वम्। अद्यप्रभृति प्रसादनिग्रहादिकं त्वयैव कार्यमिति निश्चयः"।

अथ दमनकः सत्वरं सञ्जीवकं गत्वा साक्षेपं तमिदमाह—"एह्येह्यतिदुष्टवृषभ, स्वामी पिङ्गलकस्त्वामाकारयति[82]। किं निश्शङ्को[83] भूत्वा मुहुर्मुहुर्नदसि वृथा" इति।

तच्छ्रुत्वा सञ्जीवकोऽब्रवीत्—"भद्र कोऽयं पिङ्गलकः?"

दमनक आह—किं स्वामिनं पिङ्गलकमपि न जानासि? तत् क्षणं प्रतिपालय[84]। फलेनैव ज्ञास्यसि। नन्वयं सर्वमृगपरिवृतो वटतले स्वामी पिङ्गलकनामा सिंहस्तिष्ठति।" तच्छ्रुत्वा गतायुषमिवात्मानं मन्यमानः सञ्जीवकः परं विषादमगमत्। आह च—"भद्र, भवान्साधुसमाचारो वचनपटुश्च दृश्यते। तद्यदि मामवश्यं तत्र नयसि तदभयप्रदानेन स्वामिनः सकाशात्प्रसादः कारयितव्यः[85]।"

दमनक आह—"भोः, सत्यमभिहितं भवता। तत्त्वमत्रैव तिष्ठ यावदहं तं समये दृष्ट्वा ततः पश्चा[86]त्त्वामानयामि" इति।

तथानुष्ठिते दमनकः पिङ्गलकसकाशं गत्वेदमाह—"स्वामिन्, न तत्प्राकृतं सत्त्वम्। स हि भगवतो महेश्वरस्य वाहनभूतो वृषभः। मया पृष्ट इदमूचे—'महेश्वरेण परितुष्टेन कालिन्दीपरिसरे बालतृणाग्राणि[87] भक्षयितुं समादिष्टः। किं बहुना। मम प्रदत्तं भगवता क्रीडार्थं वनमिदम्।" इति।

पिङ्गलक आह सभयम्—"सत्यं ज्ञातं मयाधुना। न देवताप्रसादं विना बालतृणभोजिनो व्यालाकीर्णे[88] एवंविधे वने निःशङ्का नदन्तो भ्रमन्ति। ततस्त्वया किमभिहितम्?"

दमनक आह—"स्वामिन्, एतदभिहितं मया यदेतद्वनं चण्डिकावाहनभूतस्य मत्स्वामिनः पिङ्गलकनाम्नः सिंहस्य विषयीभूतम्। तद्भवानभ्यागतः प्रियोऽतिथिः। तत्तस्य सकाशं गत्वा भ्रातृस्नेहेनैकत्र भक्षणपानविहरणक्रियाभिरेकस्थानाश्रयेण कालो नेयः" इति। ततस्तेनापि सर्वमेतत्प्रतिपन्नम्। उक्तं च सहर्षम्—"स्वामिनः सकाशादभयदक्षिणा दापयितव्या[89]" इति। तदत्र स्वामी प्रमाणम्[90]।

तच्छ्रुत्वा पिङ्गलक आह—"साधु सुमते, साधु। मन्त्रिश्रोत्रिय, साधु। मम हृदयेन सह संमन्त्र्य[91] भवतेदमभिहितम्। तद्दत्ता मया तस्याभयदक्षिणा। परं सोऽपि मदर्थेऽभयदक्षिणां याचयित्वा द्रुततरमानीयताम्[92]" इति। दमनकोऽपि तं प्रणम्य सञ्जीवकसकाशं प्रस्थितः सहर्षमचिन्तयत्—'अहो, प्रसादसंमुखो नः स्वामी वचनवशगश्च संवृत्तः। तन्नास्ति धन्यतरो मम। उक्तं च—

अमृतं शिशिरे वह्निरमृतं प्रियदर्शनम्।
अमृतं राजसंमान[93]ममृतं क्षीरभोजनम्'॥ १७॥

अथ सञ्जीवकसकाशमासाद्य सप्रश्रयमुवाच—"भो मित्र, प्रार्थितोऽसौ मया भवदर्थे स्वाम्यभयप्रदानम्। तद्विश्रब्धं गम्यतामिति। परं त्वया राजप्रसादमासाद्य मया सह समयधर्मेण[94] वर्तितव्यम्। न गर्वमासाद्य स्वप्रभुतया[95] विचरणीयम्, अहमपि तव सङ्केतेन सर्वं राज्यधुर[96]ममात्यपदवीमाश्रित्योद्धरिष्यामि। एवं कृते द्वयोरप्यावयो राज्यलक्ष्मीर्भोग्या भविष्यति। नो चेद्भ्रश्यते उक्तं च—

यो न पूजयते गर्वादुत्तमाधममध्यमान्।
भूपसंमानमान्योऽपि भ्रश्यते दन्तिलो यथा॥ १८॥

सञ्जीवक आह—कथमेतत्?

सोऽब्रवीत्—

कथा १

अस्त्यत्र धरातले वर्धमानं नाम नगरम्। तत्र दन्तिलो नाम नानाभाण्डपतिः सकलपुरनायकः प्रतिवसति स्म। तेन पुरकार्यं नृपकार्यं च कुर्वता तुष्टिं नीतास्तत्पुरवासिनो लोका नृपतिश्च। किं बहुना न कोऽपि तादृक्केनापि चतुरो दृष्टो नापि श्रुतो वेति। अथवा साध्विदमुच्यते—

नरपतिहितकर्ता[97] द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता॥ १९॥

अथैवं गच्छति काले दन्तिलस्य कदाचिद्विवाहः संवृत्तः। तत्र तेन सर्वे पुरनिवासिनो राजसन्निधिलोकाश्च संमानपुरस्सर[98]मामन्त्र्य[99] भोजिता[100] वस्त्रादिभिः सत्कृताश्च। ततो विवाहानन्तरं राजा सान्तःपुरः स्वगृहमानीयाभ्यर्चितः। अथ तस्य नृपतेर्गृहसंमार्जनकर्ता गोरम्भो नाम राजसेवको गृहायातोऽपि तेनानुचितस्थाने उपविष्टोऽवज्ञयार्धचन्द्रं दत्वा निःसारितः[101]। सोऽपि तदाप्रभृति निश्वसन्नपमानान्न रात्रावप्यधिशेते[102]। 'कथं मया तस्य भाण्डपते राजप्रसादहानिः कर्तव्या' इति चिन्तयन्नास्ते॥

अथ कदाचित्प्रत्यूषे योगनिद्रां[103] गतस्य राज्ञः शय्यान्ते मार्जनं कुर्वन्निदमाह—'अहो दन्तिलस्य महद्धृत्वं यद्राजमहिषीमालिङ्गयति।' तच्छ्रुत्वा राजा ससंभ्रममुत्थाय तमुवाच—"भो भो गोरम्भ, सत्यमेतत्, यत्त्वया जल्पितम्? किं देवी दन्तिलेन समालिङ्गिता?" इति। गोरम्भः प्राह—"देव, रात्रिजागरणेन द्यूतासक्तस्य मे बलान्निद्रा समायाता। तन्न वेद्मि किं मयाभिहितम्।" राजा सेर्ष्यं स्वगतम्—'एष तावदस्मद्गृहेऽप्रतिहतगतिः[104]। तथा दन्तिलोऽपि। तत्कदाचिदनेन देवी समालिङ्ग्यमाना दृष्टा भविष्यति। तेनेदमभिहितं स्यात्। उक्तं च—

> यद्वाञ्छति दिवा[105] मर्त्यो वीक्षते वा करोति वा।
> तत्स्वप्नेऽपि तदभ्यासाद्ब्रूते वाथ करोति वा॥ २०॥

एवं स राजा विचिन्त्य तत्प्रभृति दन्तिलस्य प्रसादपराङ्मुखः संजातः। किं बहुना राजद्वारप्रवेशोऽपि तस्य निवारितः। दन्तिलोऽप्यकस्मादेव प्रसादपराङ्मुख[106]मवनिपतिमवलोक्य चिन्तयामास—'मयास्य भूपतेरथवान्यस्यापि कस्यचिद्राजसम्बन्धिनः स्वप्नेऽपि नानिष्टं कृतम्। तत्किमेतत्पराङ्मुखो मां प्रति भूपतिः' इति॥

एवं तं दन्तिलं कदाचिद्राजद्वारे विष्कम्भितं विलोक्य विहसन्तं संमार्जनकर्तारं गोरम्भं दृष्ट्वा 'नूनमिदं गोरम्भस्य चेष्टितमिति विचिन्त्य स्वगृहं गत्वा निशामुखे गोरम्भमाहूय वस्त्रयुगलेन संमान्ये[107]दमुवाच—"भद्र, मया न तदा त्वं रागवशान्निःसारितः। यतस्त्वं ब्राह्मणानामग्रतो[108]ऽनुचितस्थाने समुपविष्टो दृष्ट इत्यपमानितः। तत्क्षम्यताम्' इति। सोऽपि स्वर्गराज्योपमं[109] तद्वस्त्रयुगलमासाद्य परं परितोषं गत्वा 'भोः

श्रेष्ठिन्, क्षान्तं मया ते तत्। तदस्य संमानस्य कृते पश्य मे बुद्धिप्रभावं राजप्रसादं च ' इत्युक्त्वा निष्क्रान्तः।

ततश्चान्येद्युः स गोरम्भो राजकुले गत्वा योगनिद्रां गतस्य भूपतेः संमार्जनक्रियां कुर्वन्निदमाह—"अहो! अविवेकोऽस्मद्भूपतेः, यत्पुरीषोत्सर्गमाचरंश्चिपिटकभक्षणं[110] करोति।" तच्छ्रुत्वा राजा सविस्मयं तमुवाच—"रे! रे! गोरम्भ, किमप्रस्तुतं प्रलपसि? गृहकर्मकरं त्वां मत्वा न व्यापादयामि[111]। किं त्वया कदाचिदहं एवं विधं कर्म समाचरन् दृष्टः?"

सोऽब्रवीत्—"देव, द्यूतासक्तस्य रात्रिजागरणेन संमार्जनं कुर्वाणस्य मम बलान्निद्रा समायाता। ततो मया किंचिज्जल्पितम्। तन्न वेद्मि। तत्प्रसादं करोतु स्वामी निद्रापरवशस्य" इति। तच्छ्रुत्वा स राजा चिन्तितवान्—'यन्मया जन्मान्तरेऽपि पुरीषोत्सर्गं कुर्वता कदापि चिपिटका न भक्षिताः, तद्यथायं व्यतिकरो[112]ऽसंभाव्यो मामनेन मूढेन व्याहृतः, तथा दन्तिलस्यापीति निश्चयः। तन्मया न युक्तं कृतं यत्स वराकः [113] संमानेन वियोजितः। न तादृक्पुरुषाणामेवं विधं चेष्टितं संभाव्यते। तदभावेन राजकृत्यानि पौरकृत्यानि च सर्वाणि शिथिलतां व्रजन्ति'। एवमनेकधा विमृश्य स राजा दन्तिलं समाहूय निजाङ्गवस्त्राभरणादिभिः संयोज्य स्वाधिकारे नियोजयामास[114]॥

अतोऽहं ब्रवीमि—'यो न पूजयते' इति"॥

सञ्जीवक आह—"भद्र, एवमेवैतत्। यद्भवताभिहितं तदेव मया कर्तव्यम्" इति। एवमभिहिते दमनकस्तमादाय पिङ्गलकसकाशमगमत्। आह च—"देव "एष मया नीतः स सञ्जीवकः। अधुना देवः प्रमाणम्"

सञ्जीवकोऽपि तं सादरं प्रणम्याग्रतः सविनयं स्थितः। पिङ्गलकोऽपि तस्य पीनायतककुद्मतो नखकुलिशालंकृतं दक्षिणपाणिमुपरि दत्त्वा मानपुरस्सरमुवाच—"अपि शिवं [115] भवतः? कुतस्त्वमस्मिन्वने विजने समायातोऽसि?

तेनाप्यात्मवृत्तान्तः कथितः। यथा वर्धमानेन सह वियोगः सञ्जातस्तथा सर्वं निवेदितम्। तच्छ्रुत्वा पिङ्गलकः सादरतरं तमुवाच—"वयस्य, न भेतव्यम्। मद्भुजपञ्जरपरिरक्षितेन यथेच्छं त्वयाधुना वर्तितव्यम्।

अन्यच्च नित्यं मत्समीपवर्तिना भाव्यम् । यतःकारणाद्बह्वपायं रौद्रसत्त्वनिषेवितं[116] वनं गुरूणामपि सत्त्वानामसेव्यम्, कुतः बालतृणभोजिनाम् ?"

एवमुक्त्वा सकलमृगपरिवृतो यमुनाकच्छमवतीर्योदकग्रहणं कृत्वा स्वेच्छया तदेव वनं प्रविष्टः । ततश्च करटकदमनकनिक्षिप्तराज्यभारः सञ्जीवकेन सह सुभाषितगोष्ठीमनुभवन्नास्ते । सञ्जीवकेनाप्यनेकशास्त्रावगाहनादुत्पन्नबुद्धिप्रागल्भ्येन स्तोकै[117] रेवाहोभिर्मूढमतिः पिङ्गलकस्तथा कृतो यथारण्यधर्माद्वियोज्य[118]ग्राम्यधर्मेषु नियोजितः[119] । किं बहुना प्रत्यहं पिङ्गलकसञ्जीवकावेव केवलं रहसि मन्त्रयतः । शेषः सर्वोऽपि मृगजनो दूरीभूतस्तिष्ठति । करटकदमनकावपि प्रवेशं न लभेते अन्यच्च सिंहपराक्रमाभावात्सर्वोऽपि मृगजनस्तौ च शृगालौ क्षुधाव्याधिबाधिता[120] एकां दिशमाश्रित्य स्थिताः ॥

उक्तं च—

फलहीनं[121] नृपं भृत्याः कुलीनमपि चोन्नतम् ।
सन्त्यज्यान्यत्र गच्छन्ति शुष्कं वृक्षमिवाण्डजाः[122] ॥ २१ ॥

ततः स्वामिप्रसादरहितौ क्षुत्क्षामकण्ठौ परस्परं करटकदमनकौ मन्त्रयेते ॥

तत्र दमनको ब्रूते—"आर्य, करटक, आवां तावदप्रधानतां गतौ, एष पिङ्गलकः सञ्जीवकानुरक्तः स्वव्यापारपराङ्मुखः सञ्जातः । सर्वोऽपि परिजनो गतः । तत्किं क्रियते ?" करटक आह—"यद्यपि त्वदीयवचनं न करोति तथापि स्वामी स्वदोषनाशाय वाच्यः ।

उक्तं च—

अशृण्वन्नपि बोद्धव्यो[123] मन्त्रिभिः पृथिवीपतिः ।
यथा स्वदोषनाशाय विदुरेणाम्बिकासुतः[124] ॥ २२ ॥

त्वयैव बालतृणभोजी स्वामिनः सकाशमानीतः । तत्स्वहस्तेनाङ्गाराः कर्षिताः"[125] ।

दमनक आह—"सत्यमेतत् । ममायं दोषः, न स्वामिनः ।"
करटक आह—"एवं विधे व्यतिकरे किं कर्तव्यमावयोः ?"

दमनकोऽब्रवीत्—"एवं विधेऽपि समये मम बुद्धिस्फुरणं भविष्यति, येन सञ्जीवकं प्रभोर्विश्लेषयिष्यामि[126]। उक्तं च यतः—

एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता[127]।
बुद्धिर्बुद्धिमतः सृष्टा हन्ति राष्ट्रं सनायकम् ॥ २३ ॥

तदहं मायाप्रपञ्चेन[128] गुप्तमाश्रित्य तं स्फोटयिष्यामि[129]"।

करटक आह—"भद्र, यदि कथमपि तव मायाप्रवेशं पिङ्गलको ज्ञास्यति, सञ्जीवको वा, तदा नूनं विघात एव।"

सोऽब्रवीत्—"तात, नैवं वद। गूढबुद्धिभिरापत्काले विधुरे[130]ऽपि दैवे बुद्धिः प्रयोक्तव्या। नोद्यमस्त्याज्यः। कदाचिद्घुणाक्षरन्यायेन [131] बुद्धेः साम्राज्यं भवति।

उक्तं च—

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैवेन देयमिति कापुरुषा वदन्ति।
दैवं निहत्य[132]कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः॥ २४ ॥

तदेवं ज्ञात्वा सुगूढबुद्धिप्रभावेण यथा तौ द्वावपि न ज्ञास्यतः, तथा मिथो वियोजयिष्यामि।"

करटक आह—"भद्र, अस्त्येवम्। परं तथापि महन्मे भयम्। यतो बुद्धिमान् सञ्जीवको रौद्रश्च सिंहः। यद्यपि ते बुद्धिप्रागल्भ्यम्; तथापि त्वं पिङ्गलकात्तं वियोजयितुमसमर्थ एव"।

दमनक आह—"भ्रातः, असमर्थोऽपि समर्थ एव।

उक्तं च—

उपायेन हि यत्कुर्यात्तन्न शक्यं पराक्रमैः।
काक्या कनकसूत्रेण कृष्णसर्पो निपातितः" ॥ २५ ॥

करटक आह—"कथमेतत्?"

सोऽब्रवीत्॥

कथा २

अस्ति कस्मिंश्चित्प्रदेशे महान्न्यग्रोधपादपः। तत्र वायसदम्पती प्रतिवसतः स्म। अथ तयोः प्रसवकाले वृक्षविवरान्निष्क्रम्य कृष्णसर्पः सदैव तदपत्यानि [133] भक्षयति। ततस्तौ निर्वेदा[134]दन्यवृक्षमूलनिवासिनं प्रियसुहृदं शृगालं गत्वोचतुः—"भद्र, किमेवंविधे सञ्जाते आवयोः कर्तव्यं भवति? एवं तावद्दुष्टात्मा कृष्णसर्पो वृक्षविवरान्निर्गत्यावयोर्बालकान्भक्षयति। तत्कथ्यतां तद्रक्षार्थं कश्चिदुपायः? अस्माकमपि तत्र स्तिथानां प्रतिदिनं प्राणसंशयः" इति।

